0755CH12

## एकादशः पाठः

# विद्याधनम्



न चौरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥ 1 ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ॥ 2 ॥

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥ 3 ॥

विद्या नाम नरस्य कीर्तिरतुला भाग्यक्षये चाश्रयः
धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयं च सा ।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणम्
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु॥ 4 ॥

© NCERT not to be republished

# शब्दार्थाः

| | | |
|---|---|---|
| चौरहार्यम् | चोरों के द्वारा चुराने योग्य | to be stolen by a thief |
| राजहार्यम् | राजा के द्वारा छीनने योग्य | to be attacked by a king |
| भ्रातृभाज्यम् | भाइयों के द्वारा बाँटने योग्य | to be divided among brothers |
| भारकारि | भार बढ़ाने वाली | burden |
| प्रच्छन्नगुप्तम् | अत्यन्त गुप्त | hidden |
| भोगकरी | भोग का साधन उपलब्ध कराने वाली | giving objects of pleasure |
| परा | सबसे बड़ी | the greatest |
| राजसु | राजाओं में | among kings |
| केयूराः | बाजूबन्द | bracelets |
| चन्द्रोज्ज्वला (चन्द्र+उज्ज्वला) | चन्द्रमा के समान चमकदार | as bright as the moon |
| विलेपनम् | शरीर पर लेप करने योग्य सुगन्धित-द्रव्य (चन्दन, केसर आदि) | anointing |
| नालङ्कृता (न+अलङ्कृता) | नहीं सजाया हुआ | undecorated |
| मूर्धजाः | वेणी, चोटी | plait (hair) |
| वाण्येका (वाणी+एका) | एकमात्र वाणी | speech alone |
| समलङ्करोति | अच्छी तरह सुशोभित करती है | decorates |
| संस्कृता | संस्कारयुक्त (परिष्कृत) | well cultured |
| धार्यते | धारण की जाती है | is borne |
| क्षीयन्तेऽखिलभूषणानि (क्षीयन्ते+अखिलभूषणानि | सम्पूर्ण आभूषण नष्ट हो जाते हैं | all ornaments perish |

© NCERT not to be republished

| | | |
|---|---|---|
| **भाग्यक्षये** | – अच्छे दिन बीत जाने पर | when good days end |
| **आश्रयः** | – सहारा | helper |
| **कामदुघा** | – इच्छानुसर फल देने वाली | yielding all desired objects |
| **सत्कारायतनम्** | – सम्मान का केन्द्र या समूह | storehouse of respects |
| **रत्नैर्विना** | – रत्नों से रहित | without jewells |
| **विद्याधिकारम्** | – विद्या पर अधिकार | mastery over learning |
| **तस्मादन्यमुपेक्ष्य** (तस्मात्+अन्यम्+उपेक्ष्य) | – अतः दूसरे सबको छोड़कर | therefore giving up others |





## अभ्यासः

© NCERT not to be republished

1. **उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-**

(क) विद्या राजसु पूज्यते। ☐

(ख) वाग्भूषणं भूषणं न। ☐

(ग) विद्याधनं सर्वधनेषु प्रधानम्। ☐

(घ) विदेशगमने विद्या बन्धुजनः न भवति। ☐

(ङ) सर्वं विहाय विद्याधिकारं कुरु। ☐

2. **अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनञ्च लिखत-**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | ............... | ............... | ............... |



Rationalised 2023-24

| | | | |
|---|---|---|---|
| गुरूणाम् | ............... | ............... | ............... |
| केयूराः | ............... | ............... | ............... |
| कीर्तिम् | ............... | ............... | ............... |
| भूषणानि | ............... | ............... | ............... |

## 3. श्लोकांशान् योजयत-

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | हारा न चन्द्रोज्ज्वलाः। |
| केयूराः न विभूषयन्ति पुरुषम् | न भ्रातृभाज्यं न च भारकारि। |
| न चौरहार्यं न च राजहार्यम् | या संस्कृता धार्यते। |
| सत्कारायतनं कुलस्य महिमा | विद्या-विहीनः पशुः। |
| वाण्येका समलङ्करोति पुरुषम् | रत्नैर्विना भूषणम्। |

## 4. एकपदेन प्रश्नानाम् उत्तराणि लिखत-

(क) कः पशुः?

(ख) का भोगकरी?

(ग) के पुरुषं न विभूषयन्ति?

(घ) का एका पुरुषं समलङ्करोति?

(ङ) कानि क्षीयन्ते?

## 5. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

(क) विद्याविहीनः नरः पशुः अस्ति।

(ख) विद्या राजसु पूज्यते।

© NCERT not to be republished

(ग) चन्द्रोज्ज्वलाः <u>हाराः</u> पुरुषं न अलङ्कुर्वन्ति।

(घ) <u>पिता</u> हिते नियुङ्क्ते।

(ङ) विद्याधनं <u>सर्वप्रधानं</u> धनमस्ति।

(च) विद्या <u>दिक्षु</u> कीर्तिं तनोति।

**6. पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत–**

(क) गुरूणां गुरुः का अस्ति?

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

(ग) व्यये कृते किं वर्धते?

(घ) भाग्यक्षये आश्रयः कः?

**7. मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत–**

विद्या धनम् संस्कृता सततम् कुसुमम् मूर्धजाः पशुः गुरुः रतिः

| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| **यथा–** | हाराः | अलङ्कृता | भूषणम् |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |

© NCERT not to be republished